## याजकादिभिश्च । (९/७०३)

पूर्वेण समासः सिद्ध एव, तस्य '[1]कर्तरि च' (२.२.१६/७१०) इति प्रतिषेधे प्राप्ते [2]वचनमिदमारभ्यते प्रतिप्रसवार्थम् । याजकादिभिः [3]सह षष्ठी समस्यते, तत्पुरुषश्च समासो भवति । [4]ब्राह्मणयाजकः । [5]क्षत्रिययाजकः ।

याजक । पूजक । परिचारक । [6]परिषेचक । [7]स्नातक । अध्यापक । [8]उत्सादक । उद्वर्तक । होतृ । [9]पोतृ । [10]भर्तृ । रथगणक । पत्तिगणक[11] ।

[८७] तत्स्थैश्च गुणैः षष्ठी समस्यते इति वक्तव्यम् । (म.भा.१.४१३) चन्दनगन्धः । कपित्थरसः[12] ।

[८८] [13]गुणात्तरेण तरलोपश्चेति वक्तव्यम् ।

सर्वेषां श्वेततरः सर्वश्वेतः । सर्वेषां महत्तरः सर्वमहान् । 'न निर्धारणे' (२.२.१०/७०४) इति प्रतिषेधे प्राप्ते वचनमिदम् । सर्वशुक्ला गौः ॥

## न निर्धारणे । (१०/७०४)

पूर्वेण समासे प्राप्ते प्रतिषेध आरभ्यते । निर्धारणे या षष्ठी सा न समस्यते । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम् । क्षत्रियो मनुष्याणां शूरतमः । कृष्णा गवां सम्पन्नक्षीरतमा । धावन्न-ध्वगानां शीघ्रतमः ।

[८९] प्रतिपदविधाना च षष्ठी न समस्यते इति वक्तव्यम् । (म.भा.१.४१३)

सर्पिषो ज्ञानम् । मधुनो ज्ञानम्[14] (२.३.५१/६१२) ॥

## पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन । (११/७०५)

पूरण गुण सुहितार्थ सत् अव्यय तव्य समानाधिकरण इत्येतैः सह षष्ठी न समस्यते । अर्थशब्दः प्रत्येकमभि-सम्बध्यते, तेन स्वरूपविधिर्न भवति । [15]पूरणार्थे – छात्राणां पञ्चमः । छात्राणां दशमः । गुण – बलाकायाः शौक्ल्यम् । काकस्य कार्ष्ण्यम् । सुहितार्थास्तृप्त्यर्थाः – [16]फलानां सुहितः । फलानां तृप्तः । सत्[17] (३.२.१२७/३१०६) – ब्राह्मणस्य कुर्वन् । [18]ब्राह्मणस्य कुर्वाणः । अव्यय – ब्राह्मणस्य कृत्वा[19] । ब्राह्मणस्य हृत्वा । तव्य-(३.१.९६/२८३४) – ब्राह्मणस्य [20]कर्तव्यम् । तव्यता सानुबन्धकेन समासो भवत्येव, ब्राह्मणकर्तव्यम्[21] । समानाधिकरण – शुकस्य [22]माराविदस्य । राज्ञः पाटलिपुत्रकस्य । [23]पाणिनेः सूत्रकारस्य (म. भा. १. ४१४) । किं च स्यात् ? [24]पूर्वनिपातस्यानियमः स्यात् । [25]अनन्तरायां तु प्राप्तौ प्रतिषिद्धायां 'विशेषणं विशेष्येण बहुलम्' (२. १. ५७/७३६) इति भवत्येव समासः । पूर्वनिपातश्च तदा नियोगतो विशेषणस्यैव ॥

---

1. तृजकाभ्यां इत्यधिकम् क. ड. 2. पुनर्वचनमारभ्यते इ, वचनमिदं प्रतिप्रसवार्थम् ब. क. ड. 3. सह नास्ति फ. 4. ब्राह्मणस्य याजकः इत्यधिकम् क. 5. क्षत्रियाणां याजकः । ब्राह्मणपूजकः इत्यधिकम् क. 6. परिवेषक क, परिवेष्टकः ब. 7. स्नापक क. ड. फ. 8. नास्ति ब. 9. नास्ति फ. 10. हर्तृ इत्यधिकम् क, कर्तृ इत्यधिकम् इ. 11. इति याजकादयः इत्यधिकम् ड. फ. 12. न तु तद्विशेषणैः । घृतस्य तीव्रो गन्धः । चन्दनस्य मृदुर्गन्धः । इत्यधिकम् क. 13. गुणात्तरेण–गौः नास्ति फ. ड. 14. 'ज्ञोऽविदर्थस्य करणे' इति षष्ठी इत्यधिकम् क. ड. इ. 15. पूरणे ब. इ. ह. 16. उदाहरणमिदं नास्ति ब. 17. शतृशानचौ सत्सञ्ज्ञौ भवतः इत्यधिकम् इ. 18. उदाहरणमिदं नास्ति फ. 19. वृषलस्य कृत्वा इत्यधिकम् क. फ. ह. 20. हर्तव्यम् क. 21. इति इत्यधिकम् क. 22. माराविकस्य क. ड. इ. फ. 23. उदाहरणमिदं नास्ति फ. 24. पूर्वपदनिपातस्य इ. 25. अनन्तरायां – विशेषणस्यैव नास्ति फ. ह.